नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **27**

# P-95-Sanskrit (V)

No. of Printed Pages – **08**

# प्रवेशिका परीक्षा, 2017

## संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. “शि सर्वनामस्थानम्” इति सूत्रस्यार्थो लेख्य: । **1**

2. निर्देशानुसारं रूपाणि लिखत ।

   (i) रमाशब्दस्य तृतीयाविभक्ते:

   (ii) राजन् शब्दस्य षष्ठीविभक्ते: **¾ + ¾ = 1½**

3. निम्नांकितयो: शब्दयो: मूलशब्दं विभक्तिं वचनञ्च लिखत ।

   (i) वयम्

   (ii) पत्या **¾ + ¾ = 1½**

4. निर्देशानुसारं धातुरूपाणि लिखत –

   नी (णीञ् प्रापणे) धातो: लृट् लकारे उत्तमपुरुषस्य

   शीङ् (स्वपने) धातो: लट् लकारे प्रथमपुरुषस्य **¾ + ¾ = 1½**

5. निम्नपदयो: लकारं पुरुषं वचनं च लिखत – **¾ + ¾ = 1½**

   (i) बिभेति

   (ii) हन्यात्

6. वाच्यपरिवर्तनं कुरुत –

   (i) बालक: अजां पश्यति ।

   (ii) कविना लेख: लिख्यते । **1 + 1 = 2**

7. करणसंज्ञाविधायकं सूत्रं लिखत । **2**

8. अङ्गसंज्ञाविधायकं सूत्रं विलिख्य तस्यार्थो लेख्य: **1 + 1 = 2**

9. अधोलिखितेषु यथेच्छं द्वयोः सूत्रयोः अर्थः लेख्यः ।

(i) सम्बुद्धौ च

(ii) ङिति ह्रस्वश्च

(iii) वाऽमि **1 + 1 = 2**

10. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

अस्याः कारिकायाः अर्थः लेख्यः । **2**

11. अधोलिखितेषु द्वयोः सोदाहरणार्थः लेख्यः ।

(i) कर्मणि द्वितीया

(ii) सहयुक्तेऽप्रधाने

(iii) आधारोऽधिकरणम् **1½ + 1½ = 3**

12. यथेच्छं त्रयाणाम् अव्ययपदानाम् अर्थं विलिख्य संस्कृतवाक्येषु प्रयोगं कुरूत ।

(i) पुनः

(ii) नमः

(iii) धिक्

(iv) अन्तरेण

(v) खलु **1 + 1 + 1 = 3**

13. अधोलिखितछन्दःसु द्वयोः लक्षणोदाहरणे लिखत ।

(i) मन्दाक्रान्ता

(ii) मालिनी

(iii) हरिणी **1½ + 1½ = 3**

14. द्वयो: अलङ्कारयो: लक्षणोदाहरणे लिखत ।

(i) विभावना

(ii) दृष्टान्त:

(iii) अर्थान्तरन्यास: **1½ + 1½ = 3**

15. अधोलिखितशब्दानां पर्यायत्रयं लिखत –

(i) केश: (ii) औषधम्

(iii) रक्तम् (iv) मुखम् **1 + 1 + 1 + 1 = 4**

16. अधोलिखितेषु **पञ्च** प्रश्ना: समाधेया: ।

(i) महिलारोप्यनगरस्य राजा क: आसीत् ?

(ii) केन हीना: (पुरुषा:) यौवनेऽपि वृद्धा: भवन्ति ?

(iii) पिङ्गलकनामा सिंह: कस्मात् भीतो बभूव ?

(iv) उत्तमभृत्या: कदा राजानं त्यजन्ति ?

(v) उदकार्थं सिंह: कुत्रागच्छत् ?

(vi) घण्टाकर्ण इति कस्य नाम आसीत् ?

(vii) राजपुरुषा: कृष्णसर्पं किमर्थं जघ्नु: ? **1 + 1 + 1 + 1 + 1 = 5**

17. **चत्वार**: प्रश्ना: समाधेया: ।

(i) कति वेदाङ्गानि सन्ति ?

(ii) पापसंहारिणी नदी काऽस्ति ?

(iii) सर्वेषां धर्मसाधनं किम् ?

(iv) हरनामामृतस्य लेखक: क: आसीत् ?

(v) प्रतापाय पत्रं केन प्रेषितम् ?

(vi) रामदेवस्य मातुर्नाम किमासीत् ? **1 + 1 + 1 + 1 = 4**

18. अधोलिखितयोरेकस्या: कथाया: सारांश: स्वसंस्कृते हिन्द्यां वा लेख्य: ।

(i) दुष्टबुद्धिदमनक:

(ii) सिंह-दधिकर्णकथा **2**

19. रामेषु, सर्वस्मात्, विश्वपा:, त्रय:, गाम् एषु द्वयो: सिद्धि: कार्या । **2½ + 2½ = 5**

20. रमाणाम्, मत्यै, हे श्री:, क्रोष्ट्री, रा: –एषु रूपद्वयं साधयत । **2½ + 2½ = 5**

21. हे ज्ञान, कतराणि, दध्ना, मधुनी, –एषु रूपद्वयस्य सिद्धि: विधेया । **2½ + 2½ = 5**

22. अधोलिखितोदाहरणेषु केषाञ्चन पञ्चप्रयोगानां ससूत्रं विभक्तिं निर्दिशत ।

(i) उच्चै: ।

(ii) गां दोग्धि पय: ।

(iii) विप्राय गां ददाति ।

(iv) जटाभि: तापस: ।

(v) हरये नम: ।

(vi) मोक्षे इच्छास्ति ।

(vii) नृणां द्विज: श्रेष्ठ: ।

(viii) ब्रह्मण: प्रजा: प्रजायन्ते । **1 + 1 + 1 + 1 + 1 = 5**

23. अधोलिखितगद्ययो: **एकस्य** व्याख्या कार्या ।

दमनक आह - भवान् आहारार्थी केवलमेव तन्न युक्तम् । उक्तञ्च नीतिज्ञै: वस्तुतो यस्मिन् जीवति बहवोऽत्र जीवन्ति सैव जीवतात् । यो बन्धुवर्गे दीने भृत्यवर्गे चात्मना परेण वा दयां न कुरूते तस्येह किं जीवितफलं काकोऽपि बलिं भुञ्जानश्चिराय जीवत्येव । **3**

**अथवा**

अथ कदाचित् पिङ्गलकस्यैव भ्राता स्तब्धकर्णनामा सिंह: भ्रातु: दर्शनाय समायात: । स्तब्धकर्णं स्वानुजं समायान्तं दृष्ट्वा पिङ्गिलक: प्रेम्णा तस्य स्वागतार्थं समुत्थित: । उपागतं भ्रातरं बाहूभ्यां परिष्वज्य पिङ्गलकोऽवदत् - भ्रात: ! अपि शिवं भवत: ! अपि स्वस्था: तेऽस्मत्परिजना: ? इति आम् स्वामिन् इत्युक्त्वा स: स्तब्धकर्ण: एव ज्येष्ठभ्रातुश्चरणौ ववन्दे ।

24. अधोलिखितयोरेकस्य सप्रसङ्गान्वय-व्याख्या कार्या ।

(i) विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रम: ।
यशसि चाभिरूचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

(ii) विहाय वैकुण्ठसुखाभिलाषं
लक्ष्मीविलासं विषमेव मत्वा ।
प्रसूनशय्यां पविवद् विचिन्त्य
भक्तार्तिनाशाय तवावतार: ।। **3**

25. अधोलिखितपद्ययो: **एकस्य** प्रसङ्गान्वयभावार्थो लेख्य: ।

(i) वृत्तं यत्नेन संरक्षेत्, वित्तमेति च याति च ।

अक्षीणो वित्तत: क्षीणो, वृत्ततस्तु हतो हत: ।।

(ii) गाव: प्रसन्ना: मनुजा: प्रसन्ना:

देवा: प्रसन्ना: व्रतदानयज्ञै: ।

किं नाम तद् यन्न मरौ समृद्धम्

विद्यासमृद्धो भवता विधेय: ।। **3**

26. कस्यचित् **एकस्य** विषयोपरि शतशब्देषु संस्कृते निबन्धं लिखत । **4**

(i) संस्कृतभाषाया: महत्त्वम् ।

(ii) परोपकाराय सतां विभूतय: ।

27. भवान् राजेश: "मित्रै: सह जयपुरं भ्रमणार्थं गन्तुमिच्छति" एतदर्थं स्वजनकाय पत्रं लिखतु । **3**

**अथवा**

भवान् रघुवीर: राजकीय-प्रवेशिका संस्कृत विद्यालय: शास्त्रीनगरस्य छात्र: ।

स्वप्रधानाध्यापकमहोदयाय शुल्कमुक्त्यर्थं प्रार्थना-पत्रं लिखत ।

DO NOT WRITE ANYTHING HERE